No. १०२१ – घ

Title अपराधक्षपनस्तोत्रम् सटीकम्

Author रामानन्दभिक्षु:

Extent ६ Age

Subject

नं० १०२१-घ

अपराधक्षमापनस्तोत्रम् सटीकम्

पत्राणि ६ (सम्पूर्णम्)

पत्राणि ६

नं० १०२१-घ

कर्त्ता रामानन्द भिक्षुः

६ पत्र

नं० १०२१८

अथ शिवप्रातःस्तोत्र टीका

पत्राणि ६

स्तो सं० - संपूर्ण

कर्ता ० ॥ प्रमाणक

शि० श्रीगणेशाय नमः श्रीगुरुचरणकमलेभ्यो नमः ॐ वंदे देवउमापतिं सुर
१ गुरुं वंदे जगत्कारणं वंदे पन्नगभूषणं मृगधरं वंदे पशूनां पतिं वंदे सूर्य
शशांकवह्निनयनं वंदे मुकुंदप्रियं वंदे भक्तजनाश्रयं च वरदं वंदे शिवं शं
करं १ शांतं पद्मासनस्थं शशिधरमुकुटं पंचवक्त्रं त्रिनेत्रं शूलं वज्रं च खड्
गं परशुमभयदं दक्षिणांगे वहंतं नागं पाशं च घंटां डमरुकसहितं सांकुशं
वामभागे नानालंकारयुक्तं स्फटिकमणिनिभं पार्वतीशं नमामि २ ॐ
विश्वनाथं नमस्कृत्य श्रीरामेश्वरं गुरुं शंकरस्यापराधस्य टीकेयं लिख्य
ते मया यासुखं भवत्तस्मादिति शंभुर्विश्वनाथस्तस्य संबोधने हे शंभो
मेऽपराधः क्षंतव्य इत्यन्वयः इतः परमन्यच्छ्रेयो नास्तीति पुनरपि बहुधा
संबोधयति शिव इत्यादिना भो संबोधने हे शिव सुखस्वरूप आनंदो ब्रह्मे
ति व्यजानीयादिति श्रुतेः पुनर्भो शिव शांतस्वरूप निष्कलं निष्क्रियं।
शांतमिति श्रुतेः पुनरपि भो शिव परमं मंगलस्वरूप मंगलानां मंगलमि
ति श्रुतेः हे श्रीमहादेव संप्रयंत्येतां योगिन इति श्रीब्रह्मविद्या महा त्रिविधप
रिच्छेदशून्यः दीव्यंति द्युतिदेवः द्योतनात्मकः तदुक्तं द्योतनाद्देव इत्युक्तः राम
परमात्मा सनातनः त्रिविधोस्य परिच्छेदा महाशब्देन वार्यत इत्यर्थः ब्र
ह्मविद्या सा रूप त्रिविधः परिच्छेदशून्य स्वप्रकाशो इत्यर्थः अग्निमप्यपावं १

योजनाक्षंतव्योमेऽपराधानेवाहा श्लोक आदौकर्मप्रसंगात्कलयतिकलुषं
मातृकुक्षौस्थितस्य तन्मूत्रामेध्यमध्येव्यथयतिनितरांजाठरोजातवेदाः य
द्यद्वातत्रदुःखंविषगतिविषमंशक्यतेकेनवक्तुं क्षंतव्योमेऽपराधःशिवशि
वशिवभोश्रीमहादेवशंभो १ टीका आदावितिआदौकर्मवशात् मातृ
कुक्षौगतस्यममकर्मजन्यंकलुषंपापंकर्तृ अर्थात् मांकलयतिपीडयति
स्थितंमामितिपाठेसएवार्थः पश्चात् तस्मिन्कुक्षौयन्मूत्रंअमेध्यंपुरीषं
चतयोर्मध्येस्थितंमां मातुजठरो। वन्हिर्नितरामतिशयेनव्यथयतिताप
यति अन्यद्यातत्रकुक्षौयद्यद्दुःखंतत्केनवक्तुंशक्यमेकथंभूतंविषग
तिविषमंसर्पादेर्यदृष्टिविषंतस्ययीगतिस्तस्यापिविषमंदुःसहं एतावत्या।
पिदुःखेतवभजनंनकृतमित्यपराधेशब्दार्थइत्यर्थः आंतरानुक्रियाचा।
ख्यानाहा १ श्लोक बाल्येदुःखातिरेकोमललुलितवपुस्तन्यपानेपिपा
सा नोशक्तश्चेंद्रियेभ्योभवगुणजनिताजंतवोमांनुदंति नानारोगादि
दुःखाद्रुदनपरवशःशंकरंनस्मरामि क्षंतव्योमे० २ टीका बाल्येदुः
खातिरेकोदुःखातिशयःतमेवाह मलेनविष्ठादिनालुलितवपुर्लिप्त
देहः किंचस्तन्यपानेपिपासापातुमिच्छा किंनमवचःसमुच्चयेइंद्रियेभ्यो
यदुःखंजरादिपीडाद्भुतं तदपिचवक्तुंनोशक्यंभवोसादकायसत्वादयो।

क्ष० गुणास्तैर्जनितायेजंतवोमत्कुणादयः स्तेमांतुदन्तितिदृशंतितिव्यथयंतीतिय
२ तदपिचयद्यप्येवंतथापित्वांकरमरमानंदकरं त्वांनस्मरामिकुतोनस्मरामि।
तत्राह नानाविधारोगाः शिरःपीडादयस्तद्दुःखंतस्मात् रुदनपरवशोयत्तभव
गुणजनितेति पाठेपिपासायाः विशेषणंतत्रभवत्यस्मादितिभवः कर्मज
न्मांतरस्तुतस्स्तनपानंरूपंतस्यगुणः संसारस्तेनजनितेति २ बाल्यानुक्त्वा
यौवनानाह श्लोक प्रौढोहं यौवनस्थोविषयविषधरैः पंचभिर्मर्मसंधौ
दष्टोनष्टोविवेकः सुतजनयुवतीस्वादुसौख्येनिषण्णः शैवीचिंताव्य
तीताममहृदयमहोमानगर्वाधिरूढं क्षंतव्योमे० ३ टीका प्रौढइति वा।
ल्यानंतरमहंप्रौढः प्रौढशब्दार्थमाह यौवनस्थाइति कथंभूतः पंचभिर्ज्ञा
नेंद्रियैर्मर्मसंधौचजरादिजन्यांतकरणंवस्तौदृष्टः विषयाभिमुखैरिंद्रि
यैर्विषयेषुप्रवेशितः अतएवनष्टविवेकः कुत्सात्मानात्मज्ञानः अतएवसु
तादिजन्यस्वादुसौख्येभिलषितसुखभावेनिषण्णः निमग्नः जन्यसुखज
न्यसुखबुद्धिरित्यर्थः अतएवशैवीचिंताविश्वनाथध्यानलक्षणाचिंता
व्यतीतागता अहोउत्तममममहृदयंमनः मानः पूज्यतागर्वाआव्यादिस्तो। राम
अधिरूढंप्राप्तं ३ पुनरपियौवनानेवाह श्लोक नोशक्यंस्मार्तकर्मप्र २
तिपदगहनेप्रत्यवायाकुलाख्यं श्रौतेवार्ताकथंमेद्विजकुलविहितेब्रह्ममार्गे

स्वसारे ज्ञातो धर्म्मो विचारः श्रवणमननयोः को निदिध्यासितव्यः क्षंतव्यो मे
प० ४ टीका नोत्साकामिति स्मृति प्रतिपादितं कर्म्म स्मार्त्तं तच्च तत्कर्म्म च तत्
दपि नोत्साकं कर्त्तुमिति शेषः कथंभूतं प्रतिपदगहनं पदं पदं क्षणं क्षणं प्र
ति विघ्नबाहुल्येन गहनं दुःसाध्यं विधिवत्क्रियमाणमपि सम्यक्फलं तं न भ
वतीत्यर्थः प्रतिदिगाहनमिति क्वचित्पाठः तत्र स्पष्ट एवार्थः पुनः कथं
भूतं प्रत्यवायैराकुलमसौ गमाख्यायते कथ्यत इति प्रत्यवायाकुलाख्यं
यदास्मार्त्तमपि कर्म्म कर्तुमशक्यं तदा श्रौते श्रुतिप्रतिपादिते कर्म्माणि मे
मम वार्त्ता प्रवृत्तिः कथं स्यान्न स्यादेवेत्यर्थः कथंभूते द्विजानां ब्राह्मणक्ष
त्रियवैश्यकुलानि तैर्विहिते अनुष्ठिते प्रवृत्तित इत्यर्थः पुनः कथंभूते ब्रह्म
मार्गे तस्याप्यकवर्त्मरूपे अत एव स्वस्यात्मनः सारे सारभूते सुसार इति।
क्वचित्पाठः तत्र शोभनसारभूत इत्यर्थः कथं चिन्नोदनालक्षणो यो धर्म्मो
यो विचारस्त्वेतु ज्ञातस्तथापि श्रवणमननयोः को निदिध्यासितव्यः क
र्म्मकाण्डे धर्म्मस्यैव विचारितत्वात् श्रवणेन वा कः श्रोतव्यः मननेन वा को
मंतव्यः निदिध्यासनेन वा को निदिध्यासितव्यः इत्यर्थः ४ वाङ्कायापरा
धानाह श्लोक वाङ्कायचेंद्रियाणां विगतगतमतिस्वाधिदैवाधितापैः
पापैरागैर्वियोगैर्व्यवसितवपुषः प्रोढहीनं यदीनं मिथ्यामोहाभिलाषै

क्षं० र्मे मतिमममनोधूर्जटेर्ध्यानशून्यं क्षंतव्योमे० ५ टीका वार्द्धक्येचेति ममम
२ नोमिथ्याभूतेयोमोहस्तज्जन्यैरभिलाषैर्धूर्जटेर्ध्यानशून्यंसतभ्रमतीत्यन्वयः
कथंभूतस्यइंद्रियाणांविषयान्प्रतिविगतागतिर्गमनंमतिश्चलतद्ज्ञानयस्य
3 तस्य पुनःकथंभूतस्यआधिदैवाध्यितापत्रितयैःरोगोज्वरविस्फोटादिभि
श्चकलत्रादीनांवियोगेश्चविशेषेणावसितंवर्द्धवपुर्यस्य कथंभूतैरेतैःपापैः
पापजन्यैः कथंभूतंमनः प्रौढहीनंगांभार्य्यशून्यंततएवदीनंकृपणं ५॥
बालावस्थाभ्रमकृतापराधानाह श्लोक स्थित्वास्थानेसरोजेप्रणवम
यमरुत्कुंभितेब्रह्मरंध्रे स्वांतेशांतप्रलीनेप्रकटितगहनेज्योतिरूपेपरा
ख्ये लिंगंतेब्रह्मवाच्यंसकलसुरनतंनैवदृष्टंकदाचित् क्षंतव्योमे० ६॥
टीका स्थित्वेति स्थानेविविक्तेदेशेस्थित्वातेलिंगंचतुर्भुजादिरूपंकदा
पिनदृष्टमित्यन्वयः क्वस्थानेसरोजेहृदयकमले कथंभूतेप्रणवमयःस
चारप्रधानोमरुतलेनकुंभितेस्थिरीकृते पुनःकथंभूतेसूक्ष्ममार्गेदुर्लक्ष्ये
ब्रह्ममार्गेणास्थाने ब्रह्मरंध्रेतिक्वचित्पाठः तत्रापिसएवार्थः पुनःकथं
भूतेशांतप्रलीनेब्रह्माकारवृत्तिरूपे पुनःकथंभूतेप्रकटितंगहनंदुर्गोपा। राम
लंयस्मिन् पुनःकथंभूतेज्योतिरूपेनिर्मलेसंज्ञापूर्वकोविधिरनित्यइति
दीर्घोभावः पुनःकथंभूतेपरंब्रह्मआख्यायतेप्रकाश्यतेयेनतस्मिन् क २

थंभूतंलिंगंब्रह्मवाच्यंवेदप्रतिपाद्यं पुनःकथंभूतंसकलसुरनतंब्रह्मादिभिर्नं
मस्कृतं ६ चतुर्थोप्यमकृतापराधानाह श्लोक नग्नोनिःशंकशुद्धस्त्रिगु
णविरहितोध्वस्तमोहांधकारो नासाग्रेन्यस्तदृष्टिर्विहितभवभयोनैवदृष्टः
कदाचित् उन्मन्यावस्थायात्वांविगलकलिमलंशंकरंनस्मरामि क्षंतव्योमे
प० ७ टीका नग्नइत्यादिना अहंनग्नःपरमहंसोवातरसनोभूत्वात्वांनस्म
रामीतिसंबंधः कथंभूतःनिर्गताशंकासंदेहोयस्यसः सचासौशुद्धश्चयापा
संबंधः शुद्धमपापविद्धमितिश्रुतेः पुनःकथंभूतेत्रिगुणाविरहिते गुणत्रया
तीतः केवलोनिर्गुणइतिश्रुतेः पुनःकथंभूतःध्वस्तोनष्टोमोहांधकारः॥
आवरणविक्षेपरूपशक्तिद्वयमुक्ताज्ञानलक्षणोयस्यसः पुनःकथंभूतः
नासायानासिकायाअग्रेहृदयमासनंयस्यसः अनेनचित्तस्यलयविक्षेप
रहित्वंदर्शितं पुनःकथंभूतःविहतंनष्टंभवभयंयस्यसः तरतिशोकमात्म
विदितिश्रुतेः पुनःकथंभूतंनैवदृष्टिरर्थात्त्वद्विषयिणीयस्यसः उन्मन्या
वस्थायामनंमननं उत्कृष्टंमननं उन्मननंतद्रूपावस्थातयाध्यातृध्येयध्या
नभून्यया असंप्रज्ञातसमाधिरूपयायद्वी उद्गतंमनः मनोंतर्यस्यांतयाव।
स्थाया उणादिनियःतेनात्मसाक्षात्वं तथाभागवतेसोप्येतयावरमयामनसो
निर्वृत्तित्यादि उन्मन्योनिरंजनइतिचयोगशास्त्रेतत्रायमर्थः उन्मन्यामय

स्त०
४
गतमनोभावलक्षणायामवस्थायांनिरंजनशुद्धप्रकाशातदितिशेषः कथंभूतंत्वां
निर्गतःकलिस्तन्मलस्त्वयस्माद्भक्तानामित्यर्थोन्तम् ७ सर्वावस्थापराधाना
ह श्लोक स्नात्वाप्रत्यूषकालेस्नपनजलविधौनाहृतंगांगतोयं पूजार्थंवा
कदाचिद्बहुतरंगहनाखंडबिलीदलानि नानीतापद्ममालासरसिविकसिता
गंधधूपैस्त्वदर्थं क्षंतव्योमे० ८ टीका स्नात्वेति प्रत्यूषकालेप्रातःसमये
स्नात्वात्व[illegible]दर्थंमयेतन्नसंपादितमित्यभ्याहारःएतच्छब्दार्थमाह तवस्न
पनजलविधौ स्नानार्थंजलविधानेतत्त्काले शीतोष्णसुगंधादिसंपादनार्थं
गंगातोयंगंगाजलंनाहृतंनानीतंवाशब्दः समुच्चयेतवपूजार्थं पूजानिमित्तं
बहुतराणिबहुलानिगहनानिदृढानिअखंडानिअभग्नानिबिलीदलानि
बिल्वपत्राणिचनाहृतानीति विपरणमथ्यालयः गंधधूपैःसहसरसिवि
कसितापद्ममालाचनानीता सरसि विकसितानांपद्मानांकमलानांमाला
चनसंपादितेत्यर्थः कदाचिदितिसर्वत्रः ८ पुनःसिंहावलोकन्यायेन
गार्हस्थानपराधानाह श्लोक ध्यानंचित्तेशिवाख्यंप्रचुरतरधनंनैवद
वह ३ त्तंद्विजेभ्यो हव्यंतेलक्षसंख्याहुतवहवदनेनार्पितंबीजमंत्रैः नोदृष्टंगांग
तीरेव्रतपरिचरणैरुद्रजाप्यैनदेवं क्षंतव्योमे० ९ टीका ध्यानमित्यादि राम
ना द्वयेनचित्तेमनसिशिवनित्याख्यायस्यतद्ध्यानंनकृतमिति शेषाएव ४

कारःसर्वत्रसंबध्याते द्विजेभ्यःप्रचुरतरधनंबहुतरवित्तंनैवदत्तंक्षेस्त्वदर्थेबी
जमंत्रैः नमःशिवायेति पंचाचाक्षरमंत्रैः हुतवहवदनेवन्हिमुखेलक्षाहुतिसं
ख्याकंहव्यंहवनीयं तिलादिनैवार्पितंनहुतंगांगतीरेजान्हवीतटेव्रतानिब्रह्म
चर्य्यादीनिपरिचरणानिशुश्रूषादीनि तैःरुद्रजाप्येनप्रसिद्ध्येनदेवंमहादे
वंमयानैवदृष्टमिति ९ शिवेतिदुःखापहः अत्राप्येवकारद्वयंसर्वत्रसंब
ध्यते श्लोक दुग्धैर्मध्वाज्ययुक्तैघटशतसहितैःस्नापितंनैवलिंगं नो
लिप्तंचंदनाद्यैःकनकविरचितैर्भूषणैनप्रसूनैः धूपैकर्प्पूरयुक्तैर्विवि
धरसयुतैर्नैवभक्ष्योपहारैः क्षंतव्योमे० १० टीका दुग्धैरिति एतैर्लिंगंन
स्नापितमित्याद्यन्वयः कैरेतैरित्यतआह घटशतसहितैर्दुग्धैर्दुग्धपूर्णैः
घटशतैर्लिंगंनस्नापितं कथंभूतैर्मध्वाज्ययुक्तैःक्षौद्रघृतयुतैः चंदनाद्यैर्गं
धादिभिर्नैवलिप्तंनलेपितं कनकविरचितैःस्वर्णनिर्मितैर्भूषणैर्नैवभू
षितमितिशेषः प्रसूनैःपुष्पैर्नैवपूजितंकर्प्पूरयुक्तैः कर्पूरारात्रिकसहि
तैः धूपैर्नैवधूपितमितिशेषः भक्ष्योपहारैर्नैवेद्यैःनैवभोजितमितिशेषः॥
कथंभूतैर्घृतादिभिर्भक्ष्योपहारैर्विविधरसयुक्तैःषड्रसयुतैः १० सर्वोप
हाथानक्षमापयति श्लोक करचरणकृतं[illegible]वाकायजंकर्मजंवा श्रव
णनयनजंवामानसंवापराधं विहितमविहितंवासर्वमेतत्क्षमस्व जय

स्तो०
५
जयकरुणाब्धे श्रीमहादेव शंभो ११ टीका करचरणकृतमिति हे करु
णाब्धे दयासमुद्र श्रीमहादेवेति पुरस्तादेव व्याख्यातं हे देव हे चिच्छक्ति।
विलासनदीव्यति क्रीडतीति तथा तत्संबोधनं जय जय उत्कर्षमाविष्कुरु
केन रूपेणेत्याकांक्षायामाह एतत्सर्वं क्षमस्व एतच्छब्दं परामृतं दर्शय
ति करचरणकृतमित्यादि वा शब्दः समुच्चयार्थः करचरणाभ्यां कृत
यत्पापकर्म कायजं तु वागिंद्रियकृतं वा यत्पापकर्म श्रवणामनजं श्रो
त्रेंद्रियचित्तेंद्रियाभ्यां वा जातं मानसं मनसा संकल्पविकल्पात्मकेन वा
जातं अपराधं यत्पापकर्म्मः उपसंहरति विहितमविहितं यत्किंचित्कर्म
तत्क्षमस्व नाशयेत्यर्थः ११ इदानीमाचार्य्यः परमकारुणिकतया सर्व
स्य लोकस्य परमेश्वरे मनोवृत्तिं प्रार्थ्ययते श्लोक चंद्रोद्भासितशेखरे
स्मरहरे गंगाधरे शंकरे शर्प्पैर्भूषितकर्णकंठविवरे नेत्रोत्थवैश्वानरे।
दंतित्वक्कृतसुंदरांबरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिम
चलामन्यैस्तु किं कर्मभिः १२ टीका चंद्रोद्भासितशेखरे इति तु शब्दः॥
आक्रोशे अहो हे लोक हरे हे विश्वनाथ मोक्षार्थं मुक्तये चित्तवृत्तिमनो। राम
धारणां कुरु संपादय किमन्यैर्लौकिकैः कर्मभिरित्याक्रोशात इत्यन्वयः
कथंभूते हरे चंद्रेण ललाटस्थेनोद्भासितं शेखरं मुकुटं यस्य सः स्मरं काम ५

हरतिदहतीतिस्मरहरः तस्मिन् गंगास्वर्द्धुनीधरतिविभर्त्तीति गंगाधरः
संकल्याएांकरोतीति शंकरः सर्प्पैर्वासुकि प्रमुखैर्भूषितं शोभितंकर्णकं
ठयाविवरं छिद्रंस्थानंयस्यसः नेत्रत्रयाढः स्थितः उत्पन्नोवैश्वानरोऽग्निर्य
स्यसः इतिलकृतंगजासुरचर्म्मनिर्म्मितंसुंदरंअंबरंधरतीति तथातस्मिन्
तिसर्वेत्रत्रैलोक्यबहुप्रपंचस्य सारेवाधावच्छिभूतेअधिष्ठानेइत्यर्थः कथं
भूतांचित्तवृत्तिंअचलांनिरंतरामितियावत् १२ इदानींसर्वत्यागेनऐक्यं
विधत्ते श्लोक किंदानेनधनेनवाजिकरिभिःप्राप्तेनराजेनकिं किंवापुत्र
कलत्रमित्रपशुभिर्देहेनगेहेनकिं ज्ञात्वैतत्क्षणभंगुरंसपदिरेत्याज्यंमनो
दूरतः स्वात्मस्थंगुरुवाक्यतोभजभजश्रीपार्वतीवल्लभं १३ टीका किंदानेने
ति रे अहोजनएतत्सर्वंक्षणभंगुरंक्षणमात्रविनाशिज्ञात्वाबुद्धासपदितत्क्ष
णमेवदूरतः दूरेतत्याज्यंमनसापिनध्येयमित्यर्थः तर्हि किंध्येयमित्यतआ
ह मनः गुरुवाक्यतोगुरूपदिष्टतत्वमस्यादिवाक्यतस्स्वात्मस्थंस्वात्मस्वरूप
निष्ठंकुरु संपादय आत्मस्थसंपादनेसाधनमुपदिशति भजभजश्रीपार्व
तीवल्लभंइति एतच्छ्लोकार्थंविवृणोति किंदानेनेतितथाचश्रुतिः नकर्मणा
नप्रजयाधनेनत्यागेनैकेनामृतत्वमानशुरिति १३ उत्पन्नवैराग्यानुवा
देनस्वरक्षणंप्रार्थ्यते श्लोक आयुर्नश्यतिपश्यतांप्रतिदिनंयातिक्षयं

क्ष० ६

यौवनं प्रत्यायांतिगताः पुनर्नदिवसाः कालोजगद्भक्षकाः १४ टीका आयुरिति
हेशरणदआश्रयप्रसादतस्मात्कारणात् अधुनाशरणागतंमांरक्षरक्ष
विप्रासंसारभयस्थापनार्थं चक्षेतिपाठेसंबोधनं तस्मात्कास्मादित्य मित्या
पेक्षायामाह यस्मात्प्रत्यहं वृथाआयुर्गच्छतीति जानताजनानांप्रतिदिनंआयु
नेश्यतीतिः यौवनंतारूण्यंचक्षयंयातितथागताः दिवसाःपुनःनंप्रत्याया
तिनागच्छति तथाकालोपिनिमेषाद्यात्मकतदधिष्ठातादेवोवाजगद्भक्षकः
१४ श्लोक लक्ष्मीस्तोयतरंगभंगचपलाविद्युच्चलंजीवितं तस्मान्मांशर
णागतंशरणदत्वंरक्षरक्षाधुना १५ टीका लक्ष्मीति तथालक्ष्मीरपि।
तोयतरंगभंगचपला चंचलाअस्थिरा तथाजीवितमपिविद्युद्विवचलम
स्थिरंयस्मात्तस्मादित्युपसंहारः १५ रामेंद्रवनत्रिशिष्येणरामानंदेनभिक्षु
णा सुंदरस्यापराधस्यटीकेयंलिखितापरा १६ इतिश्रीमच्छंकराचा
र्यविरचितंअपराधक्षमाक्षमाअपराधस्तोत्रंसंपूर्णं शुभमस्तु श्रीरस्तु
श्रीकृष्णार्पणमस्तु लिखितंजवाहिरगिरस्येदंपुस्तकं राम राम राम
ॐ ध्यायेन्नित्यंमहेशंरजतगिरिनिभंचारुचंद्रावतंसं रत्नाकल्पोज्वलांगंप
रशुमृगवराभीतिहस्तंप्रसन्नं पद्मासीनंसमंतात्स्तुतिममरगणैर्व्याघ्रकृत्तिं
वसानं विश्वाद्यंविश्ववंद्यंनिखिलभयहरंपंचवक्त्रंत्रिनेत्रं १ रामजी ॥ राम ६